शब्द–ब्रह्म
E ISSN 2320 – 0871
भारतीय भाषाओं की अंतर्राष्ट्रीय मासिक शोध पत्रिका
17 दिसम्बर 2019
पीअर रीव्यूड रेफ्रीड रिसर्च जर्नल

# साधुशब्दज्ञानपूर्वकम् असाधुशब्दनिवर्तनम्

डा. जयकृष्णः
सहायकाचार्यः, (व्याकरणम)
वेदविज्ञानपरम्पराविभागः, चिन्मय-विश्वविद्यापीठम्,
आदिशङ्करनिलयम्, आदिशङ्करमार्गः,
वेलियानाड्, एरणाकुलम् (कोच्चि), केरलम्, भारतम्

शोधस्य संक्षेपः

*साधुत्वस्य प्रतिपादकविषया स्मृतिः अस्ति व्याकरणम्। साधूनाम् असाधूनां च मध्ये परिचयं कारयित्वा असाधुभ्यः शब्देभ्यः साधून् शब्दान् पृथक् कृत्वा भाषायाः स्वरूपम् अक्षुण्णतया व्यवस्थापयति व्याकरणम्। व्याकरणस्य शास्त्रस्य अभावे भाषा चिरकालं यावत् एकरूपतां न भजते। कस्याः अपि संस्कृतेः शाश्वतम्र विकासाय तद्गतानां सांस्कृतिकानां मूल्यानां संरक्षणस्य भवति नितान्तम् आवश्यकता। सांस्कृतिकानि च मूल्यानि अविकृतायाः संस्कृतेः संरक्षणस्य कारणात् एव संरक्षितानि भवन्ति। संस्कृतेः च अविकृतत्वं तस्याः संस्कृतेः भाषायाः अविकृतत्वेन सम्भवति यतः भाषायाः विकृतौ तद्गतानां मूल्यानाम् अपि विकृतिः जायते। भाषा यदि दृढा अक्षुण्णा वा तर्हि तद्गतानां मूल्यानाम् अपि ह्रासः प्रायशः न भवति। अतः एव कारणात् सहस्रेभ्यः वर्षेभ्यः अपि प्राक् कालात् आरभ्य वैदिकाः सिद्धान्ताः लोके विद्यमानाः दृश्यन्ते। तत्र कारणं वैदिक्याः संस्कृतेः भाषायाः अक्षुण्णत्वम् एव। अस्याः भाषायाः अक्षुण्णत्वस्य स्थापने व्याकरणस्य महत् एव योगदानं वर्तते। भाषायाः प्रयोगस्य समये स्खालित्यानां प्रवृत्तिः दोषवशात् स्वाभाविकी एव मानवस्य। वस्तुतः एतेषां दोषाणां लोकस्य रूढौ आरोहणात् एव भाषायाः वास्तविकं स्वरूपं अपभ्रंशतां प्राप्नोति। संस्कृतभाषायाः प्रयोक्तारः अपि कदाचित् असामर्थ्यात् नियमाल्पज्ञानाद्वा अपभ्रंशे प्रवृत्तिं कुर्वन्ति येन तत्तदपभ्रंशः रुढिं प्राप्तुं यतते परन्तु तावता एव व्याकरणं सर्वं नियमयति आगत्य। अत्र लेखे पञ्चषाः प्रयोगाः तादृशाः गृहीताः प्रतिपादनाय येषु प्रयोक्तारः लक्ष्यन्ते केचन दोषमाचरन्तः। ते दोषाः न प्रसरेयुः अथवा प्रयोक्त्रन्तरस्य वाचि विलसनात् प्रागेव परिहृताः स्युः इति कश्चन प्रयासः अत्र तेषां प्रयोगाणां साधुत्वस्य प्रतिपादने क्रियते।*

मुख्य-शब्दाः : *मनोकामना-मनःकामना, मञ्चम्-पङ्कजम्-मङ्गलम्, माता-मात्री, वेद, मनुष्यता-महिलाता।*

## परिचयः

मानवस्य वाग्व्यवहारमाध्यमभूता भवति भाषा। यद्यपि सत्यं यत् श्रवणभाषणादिना काचिद् अपि भाषा व्यवहारे रूढा भवति तथापि यथा श्रुतं तथैव प्रयोक्त्रा अनुस्रियते। यदि भाषायाः स्वरूपस्य अनुरूपं श्रुतं भवति तर्हि तद्वै व्यवह्रियते यदि विपरीतं श्रुतं भवति तर्हि तदेव वा व्यवह्रियते। लोके सामान्यतया वयं पश्यामः अपि यत् बह्वीनां भाषाणां स्वरूपे प्रायशः पञ्चाशतो वर्षाणाम् अन्तराले किञ्चन वैलक्षण्यं परिवर्तनं वा दृश्यते। स्थानीयाः भाषाः याः न सन्ति तावत् लिपिबद्धाः तासां तु का कथा। तासां स्वरूपं प्रतिवर्षपञ्चके बेभिद्यमानं दृश्यते। तत्र कारणं लिपौ अबद्धानाम् आसां भाषाणां व्याकरणस्य अभावः अपि स्यात्। लिपिबद्धाः अपि बहवः भाषाः विकृतिं प्राप्ताः दृश्यन्ते। तत्र अपि कारणम् अस्माकं दृष्टौ तस्याः तस्याः भाषायाः व्याकरणस्य नियमेषु शैथिल्यं भवितुम् अर्हति इति चिन्त्यते। परन्तु देववाण्याः संस्कृतस्य विषये तु न तथा। अस्याः व्याकरणं तथा पुष्टं

शब्द–ब्रह्म
E ISSN 2320 – 0871
भारतीय भाषाओं की अंतर्राष्ट्रीय मासिक शोध पत्रिका
17 दिसम्बर 2019
पीअर रीव्यूड रेफ़ीड रिसर्च जर्नल

सुबद्धं प्राचीनं सद् अपि नित्यं नवीनं च वर्तते यत् दोषवशात् अपि संस्कृतभाषायाः स्वरूपं क्षुण्णं न भवति। तादृशाः दोषाः ये लोके अनवधानात् जायन्ते तेषां चिकित्सा अपि व्याकरणेन क्रियते। कतिपयानां तादृशानां दोषाणां परिहाराय अत्र लेखे यतामहे। मन्ये अनेन भाषापरिष्कारस्य चिकीर्षवः लाभान्विताः स्युः।

शोधस्य प्रकृतिः - अस्मिन् शोधपत्रे विमर्शेन युक्ता दृष्टिः प्रधाना अस्ति। अत्र प्रबन्धे ये शब्दाः चिन्तनाय स्वीकृताः सन्ति ते यद्यपि शास्त्रे शास्त्रकृद्भिः प्रत्यक्षतया परोक्षतया वा विचारिताः एव सन्ति तथापि दोषाणाम् अमीषाम् उल्लेखपूर्वकं प्रसङ्गानुगुणं च स्पष्टीकरणं यदि स्यात् तर्हि प्रयोक्तारः एतेषां प्रयोगाय दत्तावधानाः भविष्यन्ति।

शोधस्य उद्देश्यम् - अपभ्रंशाः परिहृताः भवेयुः साधूनां च प्रतिष्ठापनं भवेत् यथापूर्वम् इत्येव शोधस्य पत्रस्य अस्य मुख्यम् उद्देश्यम् अस्ति।

शोधपत्रस्य उपयोगिता - शिष्टैः चेष्टिता शब्दानां सम्पत् एव प्रामाण्यं भजेत तदितरशब्दाः प्रामाण्यस्य कोटौ न प्रविशेयुः इति अनेन लेखेन पाठकाः कञ्चन उपयोगम् अनुभवेयुः। अत्र कृतेषु विचारेषु न्यूनतायां सत्याम् अन्यथात्वप्रतिपादने वा पाठकाः नूतनं चिन्तनं प्राप्नुयुः।

लोकात् सङ्ग्राहं सङ्ग्राहं एतादृशानां शब्दानां साधुत्वासाधुत्वप्रतिपादने प्रकाशने च शोधप्रबन्धस्य अस्य लेखकेन शब्दब्रह्मपत्रिकासहितं नैकासु अन्यासु अपि पत्रिकासु असकृद् यत्तं वर्तते।

## शोधपत्रस्य मुख्यं विषयवस्तु

**व्याकरणदृष्ट्या साधुशब्दविवेचनम्**

**1 मनोकामना शुद्धा न भवति अपितु मनःकामना एव शुद्धा भवति**

'ईश्वरः भवतः मनोकामनां पूर्णां करोतु' इति अस्ति एकं वाक्यम्। ईश्वरः भवतः मनसः या कामना (इच्छा) अस्ति तां पूर्णां करोतु इति अस्ति अस्य वाक्यस्य अर्थः भवति। अस्मिन् वाक्ये मनोकामना इति रूपम् अशुद्धम् अस्ति। इदं कथम् अशुद्धम् इति पश्यामः - मनसः कामना इति एवं प्रकारेण अस्य पदस्य विग्रहः सम्भवति। अत्र षष्ठी-समासः[1] भवति। समासं कर्तुं द्वयोः अपि पदयोः मूलशब्दौ स्वीकर्तव्यौ भवतः। मनस् कामना इति स्थितिः भवति। ततः स्-वर्णस्य स्थाने रु[2] इति भवति। रु इत्यस्य उ-वर्णः लुप्तः[3] भवति। ततः मनर् कामना इति भवति। ततः र्-वर्णस्य स्थाने विसर्गः[4] भवति। मनः कामना इति मेलनेन विभक्ति-कार्यस्य च द्वारा मनःकामना इति रूपं भवति।

केचन मनोभावम्, मनोरथः इति एतादृशानि रूपाणि श्रुत्वा मनोकामना इति अपि प्रयोगं कुर्वन्ति। परन्तु मनोकामना इति रूपम् अशुद्धम्। अतः मनःकामना इति एव प्रयोगः कर्तव्यः। मनोभावम् इत्यादिषु प्रयोगेषु तु मनस् भाव इत्यवस्थायां स्वर्णस्य स्थाने रु इति भवति। तेन मन रु भाव इति भवति। ततः रु-स्थाने उ[5] इति वर्णः भवति। मन उ भाव इति भवति। ततः न्-वर्णात् परे यः अ वर्णः, ततः च परे यः उवर्णः, इति अनयोः स्थाने ओ इति गुणवर्णः[6] भवति। मन् ओ भाव इति मेलनेन विभक्तिकार्यस्य च द्वारा मनोभावः इति रूपं निर्मितं भवति। एवमेव

शब्द-ब्रह्म
E ISSN 2320 – 0871
भारतीय भाषाओं की अंतर्राष्ट्रीय मासिक शोध पत्रिका
17 दिसम्बर 2019
पीअर रीव्यूड रेफ्रीड रिसर्च जर्नल

मनस् + रथः = मनोरथः इत्यत्र अपि भवति।

एवं प्रकारेण तर्हि जिज्ञासा भवति यत् कदा रु(र्)-स्थाने विसर्गः भवेत् कदा च रुस्थाने उ-वर्णः भवेत् इति। अतः अस्मिन् विषये सर्वदा नियमद्वयं मुख्यतया स्मर्तव्यम्। तत्र प्रथमः यत् - यदा अ-वर्णात् परे एषः रुः भवति, अस्मात् अपि च परे यदा अवर्णः भवति तदा अस्य स्थाने उः[7] भवति। यथा देवस् अर्च्यः इत्यत्र पूर्ववत् स्स्थाने रुः, ततः देव रु अर्च्यः इत्यत्र अ-वर्णात् परे रु; ततः च परे अ-वर्णः अस्ति। अतः तस्य स्थाने उ-वर्णः भवति। देव उ अर्च्य इति मेलनेन देवो अर्च्य इति भवति। ततः ओ-वर्णे अ-वर्णः अपि सम्मिलितः[8] भवति। देवोऽर्च्यः इति रूपं भवति।

अस्मिन् विषये द्वितीयः नियमः स्मर्तव्यः यत् - यदा अ-वर्णात् परे रुः भवति ततः अपि परे यदा वर्गाणां तृतीय-चतुर्थ-पञ्चम-वर्णेषु कश्चन वर्णः अथवा ह्, य्, व्, र्, ल् इति एतेषु कोऽपि वर्णः यदि भवति तर्हि रु स्थाने उ[9] भवति। अस्य उदाहरणं मनोभावः इति उपरि दृष्टम् एव। देवो हसति इत्यादीनि अपि उदाहरणानि अत्र भवन्ति। यदा तु रु इत्यस्मात् परे द्वयोः नियमयोः उक्तेषु वर्णेषु यः कोऽपि वर्णः परे न भवति तदा प्रायशः विसर्गः तथैव तिष्ठति। यथा मनःकामना इति प्रयोगे अस्माभिः दृष्टम् एव। अतः हिन्दीभाषया आधिक्येन प्रयुज्यमानः प्रयोगः मनःकामना इति संस्कृतेन न प्रयोक्तव्यः। संस्कृतः प्रयोगः तु मनोकामना इत्येव भवति। एवमेव मनःप्रार्थना, मनःकष्टम्, मनःपूतम् इत्यादिषु प्रयोगेषु अपि व्यवस्था ज्ञातव्या।

2 मञ्चम्, पङ्कजम्, मङ्गलम्

'बालकः मंचं गच्छति', 'तडागे पंकजं विकसति', 'ईश्वरः सर्वेषां मंगलं करोति' इति सन्ति कानिचन वाक्यानि। एतेषां वाक्यानां रचना शुद्धा एव अस्ति परन्तु एषु वाक्येषु कानिचन पदानि शुद्धानि न सन्ति। अशुद्धानि तानि पदानि क्रमशः त्रिषु अपि वाक्येषु मंचम्, पंकजम्, मंगलम् इति एतानि सन्ति। एतानि किमर्थम् अशुद्धानि सन्ति इति चेत् एषु क्रमशः मंचम् इत्यत्र मअनन्तरं, पंकजम् इत्यत्र पअनन्तरं, मंगलम् इत्यत्र च म-अनन्तरं अनुस्वारः अस्ति। वस्तुतः एषु पदेषु क्रमशः यदि म-अनन्तरं ञ्-वर्णः, प-अनन्तरं ङ्-वर्णः, म-अनन्तरं च ङ्-वर्णः भवेत् तर्हि शुद्धानि रूपाणि निर्मितानि भवन्ति। यथा मञ्चम्, पङ्कजम्, मङ्गलम् इति। एवं तर्हि जिज्ञासा उत्पन्ना भवति यत् किमर्थं मञ्चम्, पङ्कजम्, मङ्गलम् इति एतेषां पदानां मध्ये क्रमशः ञ्, ङ्, ङ् इति एते एव वर्णाः श्रूयन्ते, किमर्थम् अनुस्वारः न श्रूयते ? इति चेत् अस्य विषयस्य स्पष्टता कैश्चित् सरलैः व्याकरणस्य नियमैः कर्तुं शक्नुमः। तत्र प्रथमः नियमः यथा -

एषः अनुस्वारः यदा कस्यचित् पदस्य मध्ये भवति तदा अस्य स्थाने परसवर्णः[10] भवति यदि तस्मात् अनुस्वारात् परे पञ्चसु वर्गेषु यः कः अपि वर्णः अथवा य्-व्-ल्-वर्णेषु यः

कः अपि वर्णः भवति। परसवर्णः अर्थात् परे यः वर्णः अस्ति तस्य उच्चारणस्थानेन सवर्णः (समानः) वर्णः। उदाहरणार्थम् उपरि चर्चितेषु पदेषु एकं पदं पश्यामः मञ्चम् इति। अत्र मन्च् इति धातोः अ(अच्)[11] इति प्रत्ययः भवति। मन्च् अ इति मेलनेन मन्च इति भवति। ततः न्-वर्णस्य स्थाने अनुस्वारः[12] भवति। मंच इति स्थितिः जाता भवति। अधुना अनुस्वारस्य परसवर्णः कर्तव्यः अस्ति। मं च् अ इत्यत्र अनुस्वारात् परे च् वर्णः अस्ति। अयं च्-वर्णः तु अनुस्वारस्य सवर्णः (समानः) नास्ति यतः अनुस्वारस्य उच्चारणस्थानं नासिका अस्ति परन्तु च्-वर्णस्य उच्चारणस्थानं नासिका नास्ति। अतः च्-वर्णस्य अपि यः सवर्णः अस्ति ञ्-वर्णः, तस्य नासिका इति अपि उच्चारणस्थानम् अस्ति, तेन ञ्-वर्णः एव अनुस्वारस्य स्थाने आगच्छति। ततः म ञ् च = मञ्च इति मेलनेन विभक्तिकार्यस्य च द्वारा मञ्चम् इति रूपं भवति। एवमेव पं + कज = पङ्कज इत्यत्र अनुस्वारस्य स्थाने परसवर्णः ङ्-वर्णः, मं + गल = मङ्गल इत्यत्र अनुस्वारस्य स्थाने परसवर्णः म्-वर्णः च आयाति। एषु सर्वेषु अपि पदेषु अनुस्वारः पदस्य अन्ते न लब्धः परन्तु मध्ये एव लब्धः इति दृढतया मनसि अवधानं कर्तव्यम् अतः एव तस्य स्थाने परसवर्णः वर्णः नित्यतया आगतः।

अपरः नियमः अस्मिन् विषये स्मर्तव्यः यत् यदा अनुस्वारः पदस्य अन्ते भवति तदा तस्य स्थाने पूर्वम् उक्तः परसवर्णः विकल्पेन भवति[13]। यथा सम् + चालनम् इति द्वयोः पदयोः मेलनेन समस्तं पदं निर्मितं भवति सञ्चालनम् इति संचालनम् इति च। सम्+ चालनम् इत्यत्र म्वर्णस्य अनुस्वारः भवति। सं चालनम् इति भवति। ततः अनुस्वारस्य विकल्पेन परसवर्णः भवति। रूपद्वयं प्राप्तं भवति। एवमेव संवर्धनम् / सँव्वर्धनम्, संपूर्तिः / सम्पूर्तिः; संख्या / सङ्ख्या, संज्ञा / सञ्ज्ञा इत्यादिषु सर्वत्र अनुस्वारः पदस्य अन्ते अस्ति अतः तस्य विकल्पेन परसर्णस्य द्वारा द्वे द्वे रूपे भवतः।

उक्ते विषये विशेषेण इदम् अवधानं कर्तव्यं यत् क्व अनुस्वारः पदस्य अन्ते भवति क्व च पदस्य मध्ये भवति इति। यत्र द्वयोः पदयोः पूर्वपदस्य अन्ते अनुस्वारः भवति परे च यः वर्णः अपेक्षितः सः अपि भवति यदि तर्हि अनुस्वारस्य विकल्पेन एव परसवर्णः भवति। यत्र तु पदस्य अन्ते न भवति अनुस्वारः तत्र तु तस्य नित्यतया एव परसवर्णः भवति। किञ्च, अनुस्वारस्य यथावत् स्थितिं ज्ञातुम् अनुस्वारयुक्तानां पदानां रिक्ते काले व्युत्पत्तेः चिन्तनं कुर्वद्भिः भाव्यं, तदर्थम् आद्याः व्याकरणग्रन्थाः कोषग्रन्थाः च द्रष्टव्याः, तेन मन्दं मन्दं समग्रा अपि स्पष्टता जायते।

3 सा माता , सा मात्री , सः माता

'सा सीता लव-कुशयोः माता अस्ति', 'एषा मात्री आपणिकस्य सहायतां करोति', 'कः माता जनेभ्यः न्यूनं तण्डुलं ददाति?' इति एतानि वाक्यानि श्रुत्वा मातृ-शब्दस्य विषये

शब्द–ब्रह्म
E ISSN 2320 – 0871
भारतीय भाषाओं की अंतर्राष्ट्रीय मासिक शोध पत्रिका
17 दिसम्बर 2019
पीअर रीव्यूड रेफ्रीड रिसर्च जर्नल

महती एव जिज्ञासा भवेत् श्रोतुः यत् मातृ शब्दस्य तावत् माता इति रूपं तु श्रुतं परन्तु कथं मात्री इति रूपम् अपि भवेत्? कथञ्च 'कः माता ?' इति पुंलिङ्गे अपि मातृ-शब्दस्य रूपं भवेत् ? इत्यादि। सत्यम्! एताः जिज्ञासाः अधीतशास्त्रस्य अपि कस्यचित् भवितुम् अर्हन्ति एव, ये च अधुना एव संस्कृतसम्भाषणे प्रवेशं कृतवन्तः अथवा सामान्यं प्रारम्भिकं शास्त्रज्ञानं येषाम् अस्ति तेषां तु अस्मिन् विषये जिज्ञासा अवश्यम् एव स्यात्। अस्तु उपरि लिखितेषु त्रिषु वाक्येषु एकम् एकं वाक्यं परिशीलयामः जानीमः च मातृ इति शब्दस्य विशिष्टां व्यवस्थाम् -

'सा सीता लव-कुशयोः माता अस्ति' इति अस्ति प्रथमं वाक्यम्। अत्र मातृ इति जननी वाचकस्य स्त्रीलिङ्गस्य शब्दस्य प्रथमायाः विभक्तेः एकवचने माता इति रूपं प्रयुक्तम् अस्ति। अत्र मातृ इति शब्दः ऋकारान्तः अस्ति इति कारणात् ङीप्(ई)[14] इति प्रत्ययः प्राप्तः भवति। ङीप्(ई) यदि भवेत् तर्हि तु मातृ+ई इति मेलनेन मात्री इति रूपं भवेत्। मात्री इति रूपं तु जनन्याः अर्थे न भवति। अतः भगवता पाणिनिना स्वस्रादि-गणे ये ऋकारान्ताः शब्दाः पठिताः तेभ्यः शब्देभ्यः ङीप्-प्रत्ययस्य निषेधः[15] कृतः अस्ति। अस्मिन् गणे मातृशब्दः अपि पठितः अस्ति अतः मातृ-शब्दात् ङीप्(ई) इति प्रत्ययः न भवति। मातृ सु इति अवस्थायां ऋवर्णस्य अन्[16] इति भवति। मात् अन् सु इति स्थितौ न्-वर्णात् पूर्वस्य अवर्णस्य आ-वर्णः[17] भवति। मात् आन् सु इति भवति। ततः सु इति प्रत्ययस्य लोपः[18] भवति। मात् आन् = मातान् इति स्थितौ न्-वर्णस्य अपि लोपः[19] भवति। माता इति रूपं निर्मितं भवति। माता, मातरौ, मातरः इत्यादीनि रूपाणि अत्र भवन्ति। इदं तु ज्ञातम् अस्माभिः जननीवाचकस्य मातृशब्दस्य विषये।

अधुना द्वितीयं वाक्यं पश्यामः - 'एषा मात्री आपणिकस्य सहायतां करोति' इति अस्मिन् वाक्ये मात्री इति रूपं दृश्यते। अस्य रूपस्य मूलशब्दः अपि मातृ इति एव अस्ति। अस्मात् ऋवर्णान्त-शब्दात् ङीप्(ई)[20] इति प्रत्ययः भवति। मातृ+ई इति अत्र सन्धिकार्यस्य विभक्तिकार्यस्य च द्वारा मात्री इति रूपं निर्मितं भवति। अधुना अत्र पुनः जिज्ञासा भवेत् यत् पूर्वं यथा स्वस्रादिगणे पठितात् मातृ इति शब्दात् यथा ङीप् इति प्रत्ययस्य निषेधः कथित; तथा अत्र अपि निषेधः किमर्थं न भवति इति ? इति चेत् सत्यम् अस्मिन् वाक्ये मातृ इति शब्दात् ङीप्(ई) इति प्रत्ययस्य निषेधः न भवति। तत्र कारणम् इदं यत् स्वस्रादिगणे यः मातृ इति शब्दः पठितः सः जननीवाचकः एव अस्ति। अतः जननीवाचकात् शब्दात् एव ङीप् इति प्रत्ययस्य निषेधः भवति। यः तु मातृ इति शब्दः जननीवाचकः नास्ति सः स्वस्रादिगणे नास्ति इति सिद्धान्तः। सः यदि स्वस्रादिगणे नास्ति तर्हि तस्मात् ङीप् प्रत्ययस्य निषेधः अपि न भवति। अर्थात् ङीप् इति प्रत्ययः जननीभिन्न-अर्थ-वाचकात् मातृ इति शब्दात् भवति एव। एवं तर्हि

इतोऽपि एका जिज्ञासा उत्पन्ना भवति यत् 'एषा मात्री आपणिकस्य सहायतां करोति' इति वाक्ये मात्री इति रूपस्य मूलशब्दस्य मातृ इत्यस्य कः अर्थः स्यात् इति ? इति चेत् अत्र मातृ इति शब्दः परिच्छेतृ-वाचकः अस्ति। परिच्छेत्ता अर्थात् परिमाणस्य कर्ता। अर्थात् यः 'इदं धान्यं द्रोणपरिमितम् अस्ति, पात्रे कूपीपरिमितं तैलम् अस्ति इत्यादि-रूपेण धान्य-तैल-आदीनां पदार्थानां परिमाणं निश्चिनोति सः परिच्छेत्ता भवति। एतं परिच्छेत्तारं वयम् अद्यत्वे अपि आपणादिषु पश्यामः एव तुलया शर्करा-लवण-आदीनां पदार्थानां परिमाणं कुर्वन्तम्। अस्मिन् अर्थे प्रयुक्तः मातृ इति शब्दः मा-धातोः तृच्[21] इति प्रत्ययेन निर्मितः भवति। अस्य शब्दस्य त्रिषु अपि लिङ्गेषु रूपाणि भवन्ति। एवं तर्हि परिमाणस्य कर्तुः अर्थे स्त्रीलिङ्गस्य विवक्षायां मातृ इति शब्दात् ङीप्(ई) इति प्रत्ययस्य द्वारा सम्पन्नस्य मात्री इति शब्दस्य मात्री मात्र्यौ मात्र्यः इत्यादीनि ईकारान्त-स्त्रीलिङ्गवत् रूपाणि भवन्ति इति स्पष्टता भवति।

अधुना तृतीयं वाक्यं पश्यामः - 'कः माता जनेभ्यः न्यूनं तण्डुलं ददाति ?' इति वाक्ये माता इति रूपं पुंलिङ्गे अस्ति। अत्र मूल-शब्दः परिच्छेतृ-वाचकः मातृ इति ऋ-वर्णान्तः एव अस्ति। अयं त्रिषु अपि लिङ्गेषु भवति इति उक्तम्। अतः 'कः माता जनेभ्यः न्यूनं तण्डुलं ददाति?' इति वाक्यस्य 'कः तण्डुलस्य परिमाणस्य कर्ता समीचीनतया परिमाणम् अकृत्वा तण्डुलं ददत् अस्ति?' इति अर्थः भवति। अस्य शब्दस्य पुंलिङ्गे माता मातारौ मातारः इत्यादीनि रूपाणि भवन्ति। नपुंसकलिङ्गे मातृ मातृणी मातृणि इत्यादीनि रूपाणि भवन्ति। जननी-वाचकस्य तु नित्य-स्त्रीलिङ्गस्य माता मातरौ मातरः इति रूपाणि पूर्वं कथितानि एव।

4 सः वेद । अहं वेद । सा अपि वेद । किं भवान् अपि वेद ?

एषु वाक्येषु समानः एकः शब्दः दृश्यते वेद इति। वस्तुतः एषः शब्दः न अपितु विशिष्टं किञ्चन क्रियापदम् अस्ति यस्य च अर्थः जानाति इत्यपि भवति जानामि इत्यपि। एवं तर्हि जिज्ञासा भवति यत् जानाति जानामि इत्यादीनि क्रियापदानि लट्-लकारे यथा दृश्यन्ते श्रूयन्ते च तथा वेद इति क्रियापदं तु न दृश्यते न च श्रूयते। स्वाभाविकीम् एतां जिज्ञासाम् आदाय किञ्चित् अस्मिन् विषये कथ्यते। तथाहि - विद् - ज्ञाने इति अदादिगणस्य धातोः लट्-लकारे वेत्ति वित्तः विदन्ति इत्यादीनि रूपाणि भवन्ति। इमानि रूपाणि विद् इति धातुना सह क्रमशः तिप्, तस्, झि इत्यादीनां प्रत्ययानां योजनेन निर्मितानि भवन्ति इति तु सत्यम्। परन्तु विद् इति धातोः लट्-लकारे अन्या अपि अस्ति काचित् विशिष्टा व्यवस्था। सा का व्यवस्था इति चेत् तिप् इत्यादीनां प्रत्ययानां स्थाने लिट्-लकारे ये णल् इत्यादयः आदेशाः भवन्ति ते णल् इत्यादयः आदेशाः विद् इति धातोः लट्-लकारे तिप् इत्यादीनां प्रत्ययानां स्थाने अपि भवन्तिए[22]। उदाहरणार्थम् एकं

शब्द-ब्रह्म
भारतीय भाषाओं की अंतर्राष्ट्रीय मासिक शोध पत्रिका
E ISSN 2320 – 0871
17 दिसम्बर 2019
पीअर रीव्यूड रेफ़्रीड रिसर्च जर्नल

क्रियापदं पश्यामः - विद् इति धातोः लट्। विद् ल्। लटः स्थाने तिप्। विद् ति। ति स्थाने णल्(अ)। विद् अ। धातोः इकारस्य स्थाने ए-वर्णः। वेद् अ = वेद इति क्रियापदं लट्-लकारे प्रथमपुरुषस्य एकवचने भवति। एवमेव तस्, झि इत्यनयोः स्थाने अतुस्, उस् इति आदेशं कृत्वा विदतुः विदुः इति प्रथमपुरुषस्य रूपद्वयम् इतोऽपि भवति। सिप्, थस्, थ इति एतेषां स्थाने थ, अथुस्, अ इति आदेशान् कृत्वा वेत्थ विदथुः, विद इति एतानि रूपाणि मध्यमपुरुषे प्राप्नुमः। मिप्, वस्, मस् इति एतेषां स्थाने णल् व, म इति आदेशान् कृत्वा वेद विद्व, विद्म इति एतानि रूपाणि उत्तमपुरुषे प्राप्नुमः। एषा व्यवस्था विकल्पेन भवति अतः पक्षे वेत्ति वित्तः विदन्ति इत्यादीनि रूपाणि अपि भवन्ति एव। एवं तर्हि अस्ति खलु विशिष्टा व्यवस्था विद् इति धातोः विषये। अतः एतां विशिष्टां व्यवस्थां यः वेद सः विद्-धातोः विशेषं वेद।

5 किं मनुष्यता इतिवत् महिलाता इत्यपि?

'यस्मिन् मनुष्यता भवति स एव मनुष्य भवति' इत्यस्मिन् वाक्ये मनुष्यता इति प्रयोगः कृतः अस्ति। मनुष्यता अर्थात् मनुष्यस्य भावः। अत्र मनुष्य इति शब्दात् तस्य भावः इत्यस्मिन् अर्थे तल्[23] इति प्रत्ययः विहितः अस्ति। प्रकृतिजन्यबोधे यः प्रकारः सः भावः भवति। तलन्तः सर्वदा स्त्रीलिङ्गे[24] टाबन्त एव व्यवह्रियते प्रयोगः। अस्मिन् एव अर्थे त्व इति प्रत्ययः अपि भवति। त्वेन प्रत्ययेन मनुष्यत्वम् इति प्रयोगः अपि सिद्धः भवति। एवं तर्हि यथा मनुष्यस्य भावः मनुष्यता इति प्रयोगः, किं तथैव महिलायाः भावः महिलाता इत्यपि भवितुम् अर्हति वा इति कदाचित् एकेन सुहृदा शङ्का कृता। तस्याः शङ्कायाः समाधानाय अस्मिन् विषये किञ्चित् कथयामः - महिलाता इत्यादयः प्रयोगाः भवितुम् अर्हन्ति परन्तु एतादृशः प्रयोगाः व्यवहाररूढाः न दृश्यन्ते। त्वप्रत्ययान्ताः प्रयोगाः तु महिलात्वम् इत्यादयः टाबन्ताः व्यवहारपथे दृश्यन्ते श्रूयन्ते च। टाबन्ताः तल्-प्रत्ययान्ताः विरलाः एव स्युः। तल्विधायके सूत्रे ङ्यन्तात् तु तलन्तः प्रयोगः स्त्रीता इति प्रयुक्तः दृश्यते भाष्ये[25]। एवञ्च निषेधाभावात् टाबन्तात् तलन्ताः शिष्टप्रयोगानुकरणपूर्वकं व्यवहर्तुं शक्या इति मम भाति।

## निष्कर्ष

लेखे अत्र पञ्च एव विचाराः विहिताः। यद्यपि अधीतशास्त्राणां तु एतेषु प्रतिपादितेषु विषयेषु तथा विशेषो नानुभूयेत तथापि शास्त्रान्तरीयाः जनाः अथवा अत्र प्रतिपादितान् विचारान् ससंशयं प्रयोक्तारः ये जनाः ते निश्चयेन एव अभिनवं किञ्चन चिन्तनम् एतया शब्दचतुष्टय्या प्राप्स्यन्ति एव इति विश्वसीमि। प्रतिपादितेषु चतुर्षु अपि विचारेषु ऐम् इत्यादीनां बीजाक्षराणां व्युत्पत्तिपरकः विचारः विशिष्टं महत्त्वं भजते इति मे भाति। अतः अस्य विचारस्य अपि अस्याः पत्रिकायाः माध्यमेन सर्वत्र विद्वत्सु उपस्थितिः भविष्यति कश्चन च सिद्धान्तः प्रतिष्ठापितः भविष्यति इति अहं विश्वसीमि। अस्यां पत्रिकायां

शब्दचिन्तनविषयकाः अन्ये अपि मया लेखाः प्रदत्ताः सन्ति एव इत्यतः अस्यापि लेखस्य माध्यमेन शब्दचिन्तनं संस्कृतस्य सुचिन्तकेषु पाठकेषु प्रसरिष्यति इति विशेषम् अनुमिनोमि।

सन्दर्भ ग्रन्थः


1 ब्रह्मदत्तजिज्ञासुः (व्याख्याता), अष्टाध्यायी प्रथमावृत्तिः (नवमं संस्करणम्) २००५, रामलाल-कपूर-ट्रस्ट, रेवली - सोनीपत्, हरयाणा, प्रथमः भागः, पृष्ठ संख्या - १९१, सूत्रसंख्या - २.२.८

2 भट्टोजिदीक्षितः (सम्पादकः - गिरिधरशर्मा), संस्करणम् - २०१०, वैयाकरणसिद्धान्तकौमुदी प्रथमः भागः, पृष्ठ संख्या - १५६, सू.सं.१६२, वाराणसी, मोतीलाल-बनारसीदासः।

3 ब्रह्मदत्तजिज्ञासुः (व्याख्याता), अष्टाध्यायी प्रथमावृत्तिः (नवमं संस्करणम्) २००५, रामलाल-कपूर-ट्रस्ट, रेवली - सोनीपत्, हरयाणा, प्रथमः भागः, पृष्ठ संख्या - ७१, सूत्रसंख्या - १.३.२

4 डा.जयशङ्करलालस्त्रिपाठी (सम्पादकः), काशिका (न्यास-मञ्जरी-भावबोधिनी-व्याख्यानसहिता), (प्रथमं संस्करणम्) १९८९, तारा - बुक - एजेन्सी - वाराणसी, दशमः भागः, पृष्ठसंख्या - २८५, सूत्रसंख्या - ८.३.१५

5 ब्रह्मदत्तजिज्ञासुः (व्याख्याता), अष्टाध्यायी प्रथमावृत्तिः (नवमं संस्करणम्) २००५, रामलाल-कपूर-ट्रस्ट, रेवली - सोनीपत्, हरयाणा, प्रथमः भागः, पृष्ठ संख्या - ५४, सूत्रसंख्या - ६.१.११०

6 भट्टोजिदीक्षितः (सम्पादकः - गिरिधरशर्मा), संस्करणम् - २०१०, वैयाकरणसिद्धान्तकौमुदी प्रथमः भागः, पृष्ठ संख्या - ८२, सू.सं.६९, वाराणसी, मोतीलाल-बनारसीदासः।

7 डा.जयशङ्करलालस्त्रिपाठी (सम्पादकः), काशिका (न्यास-मञ्जरी-भावबोधिनी-व्याख्यानसहिता), (प्रथमं संस्करणम्) १९८९, तारा - बुक - एजेन्सी - वाराणसी, सप्तमः भागः, पृष्ठसंख्या - १६६, सूत्रसंख्या - ६.१.११३

8 ब्रह्मदत्तजिज्ञासुः (व्याख्याता), अष्टाध्यायी प्रथमावृत्तिः (नवमं संस्करणम्) २००५, रामलाल-कपूर-ट्रस्ट, रेवली - सोनीपत्, हरयाणा, तृतीयः भागः पृष्ठ संख्या - ५१, सूत्रसंख्या - ६.१.१०५

9 भट्टोजिदीक्षितः (सम्पादकः - गिरिधरशर्मा), संस्करणम् - 2010, वैयाकरणसिद्धान्तकौमुदी प्रथमः भागः, पृष्ठ संख्या - १५९, सू.सं.१६६, वाराणसी, मोतीलाल-बनारसीदासः।

10 डा.जयशङ्करलालस्त्रिपाठी (सम्पादकः), काशिका (न्यास-मञ्जरी-भावबोधिनी-व्याख्यानसहिता), (प्रथमं संस्करणम्) १९८९, तारा - बुक - एजेन्सी - वाराणसी, दशमः भागः, पृष्ठसंख्या - ४६४, सूत्रसंख्या - ८.४.५८

11 ब्रह्मदत्तजिज्ञासुः (व्याख्याता), अष्टाध्यायी प्रथमावृत्तिः (नवमं संस्करणम्) २००५, रामलाल-कपूर-ट्रस्ट, रेवली - सोनीपत्, हरयाणा, प्रथमः भागः, पृष्ठ संख्या - ३३७, सूत्रसंख्या - ३.१.१३४

12 भट्टोजिदीक्षितः (सम्पादकः - गिरिधरशर्मा), संस्करणम् - २०१०, वैयाकरणसिद्धान्तकौमुदी प्रथमः भागः, पृष्ठ संख्या - १३०, सू.सं.१२३, वाराणसी, मोतीलाल-बनारसीदासः।

13 डा.जयशङ्करलालस्त्रिपाठी (सम्पादकः), काशिका (न्यास-मञ्जरी-भावबोधिनी-व्याख्यानसहिता), (प्रथमं संस्करणम्) १९८९, तारा - बुक - एजेन्सी - वाराणसी, दशमः भागः, पृष्ठसंख्या - ४६६, सूत्रसंख्या - ८.४.५९

14 ब्रह्मदत्तजिज्ञासुः (व्याख्याता), अष्टाध्यायी प्रथमावृत्तिः (नवमं संस्करणम्) २००५, रामलाल-कपूर-ट्रस्ट, रेवली - सोनीपत्, हरयाणा, द्वितीयः भागः, पृष्ठसंख्या - ३, सूत्रसंख्या - ४.१.६

15 भट्टोजिदीक्षितः (सम्पादकः - गिरिधरशर्मा), संस्करणम् - २०१०, वैयाकरणसिद्धान्तकौमुदी प्रथमः भागः, पृष्ठ संख्या - ३२१, सू.सं.३०८, वाराणसी, मोतीलाल-बनारसीदासः।

16 डा.जयशङ्करलालस्त्रिपाठी (सम्पादकः), काशिका (न्यास-मञ्जरी-भावबोधिनी-व्याख्यानसहिता), (प्रथमं संस्करणम्) १९८९, तारा - बुक - एजेन्सी - वाराणसी, अष्टमः भागः, पृष्ठसंख्या - ४६३, सूत्रसंख्या - ७.१.९४

17 ब्रह्मदत्तजिज्ञासुः (व्याख्याता), अष्टाध्यायी प्रथमावृत्तिः (नवमं संस्करणम्) २००५, रामलाल-कपूर-ट्रस्ट, रेवली - सोनीपत्, हरयाणा, तृतीयः भागः पृष्ठ संख्या - २६७, सूत्रसंख्या - ६.४.८

18 भट्टोजिदीक्षितः (सम्पादकः - गिरिधरशर्मा), संस्करणम् - २०१०, वैयाकरणसिद्धान्तकौमुदी प्रथमः भागः, पृष्ठ संख्या - २४८, सू.सं.२५२, वाराणसी, मोतीलाल-बनारसीदासः।

19 डा.जयशङ्करलालस्त्रिपाठी (सम्पादकः), काशिका (न्यास-मञ्जरी-भावबोधिनी-व्याख्यानसहिता), (प्रथमं संस्करणम्) १९८९, तारा - बुक - एजेन्सी - वाराणसी, दशमः भागः, पृष्ठसंख्या - १४२, सूत्रसंख्या - ८.२.७

20 ब्रह्मदत्तजिज्ञासुः (व्याख्याता), अष्टाध्यायी प्रथमावृत्तिः (नवमं संस्करणम्) २००५, रामलाल-कपूर-

*ट्रस्ट, रेवली - सोनीपत्, हरयाणा, द्वितीयः भागः, पृष्ठसंख्या - ३, सूत्रसंख्या - ४.१.६*

*21 भट्टोजिदीक्षितः (सम्पादकः - गिरिधरशर्मा), संस्करणम् - २०१०, वैयाकरणसिद्धान्तकौमुदी, चतुर्थः भागः, पृष्ठ संख्या - ३१, सू.सं.२८९५, वाराणसी, मोतीलाल-बनारसीदासः।*

*22 डा.जयशङ्करलालस्त्रिपाठी (सम्पादकः), काशिका (न्यास-मञ्जरी-भावबोधिनी-व्याख्यानसहिता), (प्रथमं संस्करणम्) १९८९, तारा - बुक - एजेन्सी - वाराणसी, चतुर्थः भागः, पृष्ठसंख्या - २२८, सूत्रसंख्या - ३.४.८३*

*23 ब्रह्मदत्तजिज्ञासुः (व्याख्याता), अष्टाध्यायी प्रथमावृत्तिः (नवमं संस्करणम्) 2005, रामलाल-कपूर-ट्रस्ट, रेवली - सोनीपत्, हरयाणा, द्वितीयः भागः, पृष्ठसंख्या - २८८, सूत्रसंख्या - ५.१.११८*

*24 भट्टोजिदीक्षितः (सम्पादकः - गिरिधरशर्मा), संस्करणम् - २०१०, वैयाकरणसिद्धान्तकौमुदी, द्वितीयः भागः, पृष्ठ संख्या - ५२७, लिङ्गानुशासनम्.सू.सं.१७, वाराणसी, मोतीलाल-बनारसीदासः।*

*25 भार्गवशास्त्री (सम्पादकः), महाभाष्यम्, (द्वितीयं संस्करणम्) १९८८, चौखम्बा-संस्कृत-प्रतिष्ठानम्, वाराणसी, चतुर्थः भागः, पृष्ठसंख्या - २९३, सूत्रसंख्या - ५.१.११९*